Original Article
ISSN (Online): 2582-7472

ShodhKosh: Journal of Visual and Performing Arts
January-June 2024 5(1), 3377–3388

# A COMPARATIVE STUDY ON GAYATRI METRE BETWEEN RIKPRĀTIŚĀKHYA AND PINGALACHANDASUTRA

# ऋक्प्रातिशाख्यवर्णितस्य पिङ्गलच्छन्दःसूत्रवर्णितस्य च गायत्रीछन्दसः तुलनात्मकं समीक्षणम्

Sunanda Bishnu [1], Laxminarayan Pandey [2]

[1] Department of Sanskrit, Mansarovar Global University, Sehore, M.P., India

**DOI**
10.29121/shodhkosh.v5.i1.2024.6084

**Funding:** This research received no specific grant from any funding agency in the public, commercial, or not-for-profit sectors.

**Copyright:** © 2024 The Author(s). This work is licensed under a Creative Commons Attribution 4.0 International License.

With the license CC-BY, authors retain the copyright, allowing anyone to download, reuse, re-print, modify, distribute, and/or copy their contribution. The work must be properly attributed to its author.

OPEN ACCESS

## ABSTRACT

**English:** The Vedas are indeed a vast and pure array of words, the fruit of the essence experienced by the Indian intellectuals in the scriptures of spirituality through the religious practices realized in literature, poetry and dictionaries. The Vedas are the root of all religion. That Veda, which consists of mantras and Brahmanas, is not only revered in Indian literature, but also shines in the sky of world literature, shining with its own unparalleled image. The text which teaches the worldly means of attaining the desired and avoiding the undesired is the Veda, according to the commentator on the Vedas, Sainacharya. The Vedas, the oldest texts in world literature, reveal the means of attaining both worldly and spiritual welfare, religion and the giver of its fruits. The oldest form and development of human culture can be determined by examining the Vedas. India's great reputation in the entire world is based on the Vedas. The history of the human race and the nature of modern linguistics are examined through the study of the Vedas. It is also true that the mystery of the Vedas is the fundamental study, criticism and contemplation of the six limbs of teaching and other parts of the Vedas.

**Hindi:** साहित्य-काव्य-कोश-साक्षात्कृतधर्मैर्भारतीयमणीषाभिरध्यात्मशास्त्रानुभूततत्त्वस्य फलं खलु विशालो विमलः शब्दराजिर्वेदः । वेदोऽखिलो धर्ममूलम् । मन्त्रब्राह्मणात्मकः सः वेदो न केवलं भारतीयवाङ्मयेष्वेव समादृतः, अपि तु विश्वसाहित्याकाशेऽपि स्वकीयया अप्रतिमप्रतिभया देदीप्यमानः सन् राराजते । इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः इति वेदभाष्यकार-सायणाचार्यराद्धान्तः । विश्वसाहित्ये सर्वतः प्राचीनतमो ग्रन्थः वेद एव ऐहिकामुष्मिकोभयविधश्रेयःसाधनस्य धर्मस्य तत्फलं दातुरीश्वरस्य च प्रकाशकः । मानवसंस्कृतेः प्राचीनतमं स्वरूपं विकासश्च वेदस्य परिशीलनेनैव निश्चेतुं शक्यते । समस्तेऽपि जगतीतले भारतस्य महती प्रतिष्ठा वेदमाश्रित्यैवास्ति । मानवजातेरितिवृत्तस्य आधुनिकभाषाविज्ञानस्य च स्वरूपं वेदाध्ययनेनैव परिशील्यते । इदमपि सत्यमतिरोहितमेवास्ति यद् शिक्षादिषडङ्गानां तथा षड्वेदाङ्गानां मौलिकानुशीलनं, पर्यालोचनं, मननं चान्तरेण वेदानां रहस्यं

**Keywords:** Concise Summary, Introduction, Introduction to Rikpratishakhya, Introduction to Pingalachchanda Sutra, Explanation of The Word Gayatri, Gayatri Chanda of Rikpratishakhya, Gayatri Chanda of Pingalachchanda Sutra, Comparative Review of Gayatri Chanda Described in Rikpratishakhya- Pingalachchanda Sutra, Conclusion, Glossary of Terms, Bibliography, संक्षिप्तसारः, अवतरणिका, ऋक्प्रातिशाख्यस्य परिचयः, पिङ्गलच्छन्दःसूत्रस्य परिचयः, गायत्रीशब्दस्य व्याख्या, ऋक्प्रातिशाख्यस्य गायत्रीच्छन्दः, पिङ्गलच्छन्दःसूत्रस्य गायत्रीच्छन्दः, ऋक्प्रातिशाख्यस्य- पिङ्गलच्छन्दःसूत्रवर्णितस्य गायत्रीछन्दसः तुलनात्मकं समीक्षणम्, उपसंहारः, शब्दसंक्षेपसूची, ग्रन्थपञ्जी

# 1. प्रस्तावना

वेदार्थावबोधनाय आविर्भूतेषु शिक्षादिषु वेदाङ्गेषु छन्दो नाम वेदाङ्ग वेदपुरुषस्य गतिकारकमङ्गस्थानं पादस्थानमिति[1] वर्तते । छन्दसस्तत्त्वमपरिज्ञाय वैदिकसाहित्यस्य याथातथ्येन परिज्ञानमसम्भवमेव । छन्दोहीनो न शब्दोऽस्ति, न छन्दः शब्दवर्जितम् - इति नाट्यशास्त्रकृद्भरतार्यस्य मतमिति पूर्वे उल्लिखितम् । *ऋकसर्वानुक्रमणी*- ग्रन्थानुसारेण छन्दो नाम यदक्षरपरिमाणं तच्छन्दः[2] इति । शब्दस्यास्य छन्दसो व्युत्पत्तिप्रदर्शनावसरे उच्यते ***चन्दयति*** आह्लादयति चन्दतेऽनेन वा । *चदि आह्लादे दीप्तौ च* - इति भ्वादिगणीयेन परस्मैपदीयेन सेट्-धातुना सह *इदितो नुम् धातोः*[3] इति सूत्रानुसारेण नुमागमः । चन्द्यते अनेनेति वेति विग्रहे *चन्दोरादेश्च छः*[4] - इति उणादिसूत्रेण असुनि प्रत्यये कृते सति आदिवर्णस्य च-कारस्य छ-कारे कृते च छन्दः शब्दोऽयं निष्पद्यते । तैत्तिरीयसंहितायाम् ऋषिणोक्तम् - ते छन्दोभिरात्मानं छादयित्वोपायँस्तच्छन्दसां छन्दस्त्वम्[5] इति । दैवतब्राह्मणे उक्तम् - छन्दांसि छन्दयतीति वा[6] इति । छन्द्यांसि छादनात्[7] इति यास्काचार्यकृतं निर्वचनम् ।

छन्दःशास्त्रस्योत्पत्तिविषये *प्राकृतपिंगलः*-ग्रन्थस्य भाष्यकारः लक्ष्मीनाथभट्ट-महोदयः ग्रन्थारम्भे ग्रन्थस्य प्रथमश्लोकस्य भाष्ये किञ्चन विवरणं प्रदत्तवान्, यदेव ग्रन्थस्यास्य ग्रन्थकारेणापि सूचितम् । एकदा शेषनागः पिङ्गलनाम्ना ब्राह्मणरूपं धारयन् तस्यैकस्य फणस्योपरि स्थितस्य पृथिवीग्रहस्य विस्तारं द्रष्टुं पृथिव्यां प्रादुर्बभुवः । ज्ञात्वेदं तस्य प्रागरिः गरुडः तन्मार्गं बाधितवान् । ततः पलायनमार्गं विचिन्तयन् पिङ्गलः तं गरुडमवदत् यत् प्रतीक्षयतु किमिदमविज्ञातं तेन यत् खलु स एक महान् कविः? केवलं पश्यतु, कथं स अपरिमितमात्रायां मात्रिकसंयोजनानि लिखितुं शक्नोति । यदि स गरुडः तं पिङ्गलं पुनरावृत्तिकर्तुं लक्षयति तर्हि स तं तत्क्षणात् खादितुं शक्नोति । गरुडः तं पिङ्गलं समर्थयति, पिङ्गलोऽपि एकाक्षरतः षट्विंशत्यक्षराणि गृहीत्वा छन्दसः भिन्न-भिन्न-प्रस्तारप्रयोगेन रचयितुं प्रारब्धवान् । क्रमेण स तटं प्रति गत्वोदके कूर्दितवान्, त्यक्त्वा गरुडोऽपि भ्रान्तोऽभवत् । ततः परं छन्दोविज्ञानं जनैर्ज्ञायते ।

अस्माकं प्राचीनधर्मग्रन्थस्य वेदस्य नामान्तरं तु छन्दः (*छन्दस्*) इति, यतो हि वैदिकमन्त्राः छन्दोवद्धा एव । यजुर्वेदस्य कतिपयांशं विहाय सर्वे वेदाः छन्दोवद्धाः स्युः । तदर्थं ते *छन्दस्*-इति शब्देन व्यपदिश्यन्ते । वैयाकरण-पाणिनि-महोदयस्य रचनायां प्रायशः *छन्दस्*-इति शब्देन वेद-इत्यमगव्यते । न केवलं चतुर्षु वेदेष्वपि तु लौकिकसाहित्यैव छन्दःप्राचुर्यमकल्पनीयम् ।

एतदेव ज्ञायते यद्गायत्र्यादि विभागेन वैदिकछन्दांसि सप्तधा विभज्यन्ते । तानि च - गायत्री, उष्णिक, अनुष्टुप्, बृहती, पङक्तिः, त्रिष्टुप्, जगती च । छन्दःस्वेतेषु गायत्री एव अष्टाक्षरविशिष्टा, यथा परं परं तेषु छन्दःसु पूर्वस्मात् पूर्वस्मात् छन्दसः उत्तरमुत्तरं चतुर्भिरक्षरैर्भूयो भवति । तदुच्यते ***चतुर्भूयः परं परम्***[8] इति । अतएव गायत्री - अष्टाक्षरा; उष्णिक् – (८+४=१२) द्वादशाक्षरा; अनुष्टुप् – (१२+४=१६) षोडशाक्षरा; बृहती - (१६+४=२०) विंशत्यक्षरा; पङक्तिः (२०+४=२४) - चतुर्विंशत्यक्षरा; त्रिष्टुप् (२४+४=२८) - अष्टाविंशत्यक्षरा; जगती (२८+४=३२) - द्वात्रिंशदक्षरविशिष्टा एवेति ।[9]

वेदेषु मन्त्राः प्रायश्छन्दोबद्धाः सन्ति । तेषां छन्दसां ज्ञानाय छन्दःशास्त्रस्य ज्ञानमनिवार्यं वर्तते । छन्दः शास्त्रविषयको मुख्योग्रन्थः पिङ्गलछन्दसूत्रमेव वर्तते । *छन्दोमञ्जरी, वृत्तरत्नाकरः* प्रभृतय अपि ग्रन्थाः छन्दःशास्त्रस्य ज्ञानायोपादेया सन्ति ।

निखिलेऽस्मिन् संस्कृतवाङ्मये छन्दःशास्त्रस्य द्वौ भेदौ स्तः - वैदिकछन्दांसि लौकिकछन्दांसि चेति । गायत्र्यादि विभागेन वैदिकछन्दांसि सप्तधा विभज्यन्ते । तानि च - गायत्री, उष्णिक, अनुष्टुप्, बृहती, पङक्तिः, त्रिष्टुप्, जगती च । उच्यते तर्हि –

***गायत्र्युष्णिगनुष्टुप् च बृहती च प्रजापतेः । पङ्क्तिस्त्रिष्टुब् जगती च सप्त छन्दांसि तानि ह ।।***[10] इति ।

एतेषु सप्तसु छन्दःसु गायत्रीछन्दस आलोचना, ऋक्प्रातिशाख्यग्रन्थे पिङ्गलछन्दःसूत्रे च प्रतिपादितायाः गायत्र्याः तुलनात्मकसमीक्षा चात्र यथामति परिवेशिता मया ।

---

1. [1] छन्दः पादौ तु वेदस्य (पा.शि. - 41)
2. [2] ऋक्सर्वा. – 2.6
3. [3] पा. – 7.1.58
4. [4] उ. - 658
5. [5] तै.सं. – 5.6.6.1
6. [6] दै.ब्रा. – 1.3
7. [7] नि. – 7.12
8. [8] ऋक्प्रा. – 16.2
9. [9] अष्टाक्षरप्रभृतीनि (ऋक्प्रा., उ.भा. – 16.1)
10. [10] ऋक्प्रा. – 16.1

## 2. ऋक्प्रातिशाख्यस्य परिचय

ऋग्यजुस्सामाथर्वेषु चतुर्षु वेदेषु ऋग्वेदस्य प्रातिशाख्यम् एव *ऋक्प्रातिशाख्यम्*। ग्रन्थस्यास्य रचयिता एव आचार्यः शौनकः। ग्रन्थस्यास्य भाष्यकार उवटाचार्यः, भाष्यस्य नाम एव *उवटभाष्यम्*। प्रतिवेदस्य प्रातिशाख्यग्रन्थो विद्यते। तत्र पौर्वापर्यस्तु इत्थम् – 1. ऋग्वेदप्रातिशाख्यम् 2. तैत्तिरीयप्रातिशाख्यम् 3. वाजसनेयिप्रातिशाख्यम् 4. शौनकीया चतुरध्यायिका 5. ऋक्तन्त्रम् 6. अथर्ववेदप्रातिशाख्यम् इति।

ग्रन्थस्यास्य प्रथमसंस्करणमेव 1859 ख्रीष्टाब्दे एम.ए.रेग्नियर-महोदयेन प्रस्तूयते। तत्र ग्रन्थस्थितानां सूत्राणां फ्रेञ्च-अनुवादः कृतः, अपि च उवटभाष्यमवलम्ब्य सूत्राणां व्याख्याः अपि कृता तत्रभवता एम.ए.रेग्नियर-महोदयेन। ग्रन्थस्यास्य द्वितीयसंस्करणमेव 1869 ख्रीष्टाब्दे मैक्समूलर-महोदयेन प्रस्तूयते। तत्र ग्रन्थस्थितानां सूत्राणां जर्मान-अनुवादः कृतः, अपि च उवटभाष्यमवलम्ब्य सूत्राणां व्याख्याः अपि कृता तत्रभवता मैक्समूलर-महोदयेन। पुनः, ग्रन्थस्यास्य तृतीयसंस्करणमेव 1869 ख्रीष्टाब्दे सत्यव्रतसामश्रमी-महोदयेन प्रस्तूयते। पुनः, ग्रन्थस्यास्य चतुर्थसंस्करणमेव 1903 ख्रीष्टाब्दे उवटभाष्यसहितम् ऋक्प्रातिशाख्यस्य संस्करणं पण्डित-युगलकिशेर-व्यास-महोदयेन तच्छिष्येन पण्डित-प्रभुदत्तशर्मणा च कृतम्। पुनः, ग्रन्थस्यास्य पञ्चमसंस्करणमेव 1905 ख्रीष्टाब्दे उवटभाष्यसहितम् ऋक्प्रातिशाख्यस्य संस्करणं हितव्रत-सामकण्ठ-महोदयेन कलिकातातः कृतम्। तदनन्तरं डा. मङ्गलदेव-शास्त्री महोदयेन उवटभाष्यसहितस्य ऋक्प्रातिशाख्यस्य खण्डत्रयेण अत्युत्तमं संस्करणमेकं प्रकाशितम्। तत्र प्रथमे खण्डे प्रातिशाख्यस्यास्य कर्ता, भाषा, रचनाशैली आदि प्रतिपादिता। द्वितीये खण्डे उवटभाष्यसहितानि प्रातिशाख्यास्यास्य सूत्राणि समुल्लिखितानि। तृतीये खण्डे तु ग्रन्थस्यास्य आङ्गलभाषायाम् अनुवादः टिप्पनी च सन्निवेशिता तत्रभवता ग्रन्थकारेण। तदनन्तरं 1930 ख्रीष्टाब्दे अध्यापक-सिद्धेश्वर-भट्टाचार्य-महोदयस्य उवट-भाष्य-सहितम् *ऋग्वेदप्रातिशाख्यम्* वाराणस्याः काशी हिन्दू विश्वविद्यालय शोध-प्रकाशनतः प्रकाशितोऽभूत्। तदनन्तरं अध्यापक-वीरेन्द्रकुमाक-वर्मा-महोदयेन अनुवादितं परिष्कृतम् उवटभाष्य-संवलितम् ऋद्वेदप्रातिशाख्यम् प्रकाशितं जातं चौखम्बा-संस्कृत-प्रतिष्ठानतः 1986 ख्रीष्टाब्दे। अध्यापक-व्रजबिहारी-चौवे-महोदय-प्रणीतम् *ऋग्वेगप्रातिशाख्य* (पटल १ – ४) भारतीय विद्या प्रकाशन, दिल्लीतः 1986 ख्रीष्टाब्दे प्रकाशितोऽभूत्। *शौनकीय ऋग्वेगप्रातिशाख्य* (प्रथमतश्चतुर्थपटलं यावत्, षोडशपटलञ्च) अध्यापक-तारकनाथ-अधिकारी-महोदयेन सम्पादितं कोलकातायाः संस्कृत-वुक-डिपोतः 2007 ख्रीष्टाब्दे। तत्परं, *शौनकविचरितम् ऋग्वेदप्रातिशाख्यम्, पशुपतिशास्त्रिकृतटीकासमेतम्* प्रकाशितं सम्पादकेन अनुवादकेन व्याख्याकारेण अध्यापक-अमरकुमार-चट्टोपाध्याय-महाभागेन कोलकातायाः संस्कृत-पुस्तक-भाण्डारतः 2008 ख्रीष्टाब्दे।

सर्वेषामेव वेदानां सर्वेषु प्रातिशाख्येषु ऋग्वेदीयम् ऋक्प्रातिशाख्यं प्राचीनतानुसारेण प्रामाणिकतानुसारेण विषयविस्तारेण च शीर्षस्थानीयमस्ति। इदमेव ऋग्वेदस्य आश्वलायनशाखासम्बद्धम्। <u>ग्रन्थस्यास्य विशेषता एव</u> – क) ग्रन्थस्यास्य विषयवर्णनाप्रसङ्गे बहवः पारिभाषिकाः शब्दाः व्यवहृताः (प्रवादः, न्यायः, प्रतिकण्ठः, नियतः, प्रत्यय आदि) य एव अन्यत्र न दृश्यन्ते। ख) ग्रन्थेऽस्मिन् अष्टादश-पटलाः सन्ति। प्रतिपटलस्य विषयभेदेन पृथक्पृथक् नामानि सन्ति यदेवान्यत्र न प्राप्यते। ग) चतुर्दशपटले उच्चारण-दोषविषयकानि साङ्गोपाङ्ग-विवरणानि सन्ति, यदेवान्यत्र न दृश्यते। घ) ग्रन्थस्य रचना सूत्रैः विरचिता सत्यपि ग्रन्थस्य अस्पष्टता कृत्रिमता च नास्ति। ङ) ऋग्वेदस्य मन्त्रविषयकाः सर्वाः विशेषेताः प्रातिशाख्येनानेन प्रकाशिताः जाताः तत्रभवता ग्रन्थकारेण।

## 3. पिङ्गलच्छन्दःसूत्रस्य परिचय

पिङ्गलच्छन्दःसूत्रम् इति ग्रन्थस्य रचयिता एव पिङ्गलाचार्यः। ग्रन्थस्यास्य मङ्गलाचरणेऽपि उक्तम् – ***श्रीमत्पिङ्गलनागोक्तच्छन्दःशास्त्रमहोदधौ***[11] इति। अपि तु ***पिङ्गलाचार्यसूत्रस्य***...[12] इति।

पिङ्गलाचार्य एव दाक्षीपुत्र इति मन्यते विद्वद्भिः। तन्त्राचार्यो भास्कराचार्यस्तस्य भाष्यराजः – इति ग्रन्थे पिङ्गलाचार्यस्य पितुर्नाम दाक्षी इति उल्लेखयामास –

श्रीदाक्षीसरसीगर्भकन्दं पिङ्गलनालकम्। अध्यायाष्टकपत्राच्यं सूत्रकेसरभासुरम्॥ इति।

आचार्य-चिन्तामणि-विर,तस्य छन्दःसार-ग्रन्थस्य वृत्तिकारः श्रीखण्डेणोऽपि तं दाक्षीपुत्रमिति मन्यते – दाक्षीपुत्रप्रणीतप्रतिथपृथुनहाशास्त्रशैलैकसिंहो बाजीरायाभिधोऽलङ्कृतिविषयजुषां शासको यत्पिताभुत् इति। वृत्तमढ्जरी-ग्रन्थस्य रचयिता धीरेश्वराचार्यः तस्य ग्रन्थे पिङ्गलाचार्यस्य प्रतिमूर्तमेकां निर्णयामास –

अक्षसूत्रकरकाजिनोज्ज्वलः सोपवीतधृतमौञ्जमेखलः।
ज्वालपिङ्गलजटः सदग्रणीश्छान्दसो जयति पिङ्गलो मुनिः॥ इति।

[11] पिङ्ग. – मङ्गलाचरणम्,1
[12] पिङ्ग. – मङ्गलाचरणम्, 2

आसीत् पिङ्गलाचार्य एव वैयाकरणपाणिनेः भ्राता । आनुमानिकः 700-300 ख्रीष्टपूर्वाब्द एव तस्य पिङ्गलाचार्यस्य समयकाल इति मन्यते विद्वद्भिः ।

पिङ्गलच्छन्दःसूत्रम् इति ग्रन्थस्य वृत्तिकार एव हलायुधः । तन्मते पिङ्गलाचार्यसूत्रं खलु वेदानां प्रथमाङ्गस्वरूपम्, कवीनां नयनस्वरूपञ्चेति – ***वेदानां प्रथमाङ्गस्य कवीनां नयनस्य च । पिङ्गलाचार्यसूत्रस्य ...***[13] इति । छन्दःशास्त्रेषु एतद्ग्रन्थ एवामृतायते । तदुक्तं वृत्तिकारेण हलायुधेन –

***क्षीराब्धेरमृतं यद्वदुद्धृतं देवदानवैः । छन्दोऽब्धेः पिङ्गलाचार्यश्छन्दोऽमृतं तथोद्धृतम् ।।***[14] इति ।

स पिङ्गलाचार्य एव शिवभक्त आसीत् । ग्रन्थस्यास्य मङ्गलाचरणे तेनैवोक्तम् –

***नमस्तुङ्गशिरश्चुम्बिचन्द्रचामरचारवे । त्रैलोक्यनगरारम्भमूलस्तम्भाय सम्भवे ।।***[15] इति ।

मङ्गलाचरणस्यान्तिमे चोक्तम् – ***मयरसतजभनलगसम्मितं भ्रमति वाङ्मयं जगति यस्य ।***
***स जयति पिङ्गलनागः शिवप्रसादाद्विशुद्धमतिः ।।***[16] इति ।

पिङ्गलचछन्दःसूत्रे अष्टाध्यायाः सन्ति । तत्र मङ्गलाचरणादनन्तरं प्रथमाध्याये लौकिकछन्दःशास्त्रस्य भादयो ये दश गणाः सन्ति ते सर्वे एवात्र समुल्लिख्यन्ते । यथा –

त्रिगुरुं विद्धि मकारं लघ्वादिसमन्वितं यकाराख्यम् । लघुमध्यमञ्च रेफं सकारमन्ते गुरु निबद्धम् ।।
लघ्वन्त्यं हि तकारं जकारमुभयोर्लघुं विजानीयात् । आदिगुरुञ्च भकारं नकारमिह पैङ्गले त्रिलघुम् ।।
दीर्घं संयोगपरं तथा प्लुतं व्यञ्जनान्तमुष्मान्तम् । सानुस्वारञ्च गुरुं क्वचिदवसानेऽपि लघ्वन्त्यम् ।।
आदिमध्यावसानेषु य-र-ता यान्ति लाघवम् । भ-ज-सा गौरवं यान्ति म-नौ तु गुरुलाघवम् ।
त्रिविरामं दशवर्णं षण्मात्रमुवाच पिङ्गलः सूत्रम् । छन्दोवर्गपदार्थप्रत्यहेतोश्च शास्त्रादौ ।।[17] इति ।।

## 4. गायत्रीशब्दस्य व्याख्या

वैदिकसाहित्ये सप्तसु छन्दःसु गायत्री एव प्रथमा । गायन्तं त्रायते इति विग्रहे त्रैङपालने धातुना सह ***आतोऽनुपसर्गे कः***[18] इति सूत्रेण कः-प्रत्ययः, ततो गौरादित्वात्ङीष् इति कृत्वा गायत्री-इति शब्दो निष्पन्नं भवति । पुनः, गै-धातुना सह करणवाच्ये ष्ट्रन्-प्रत्यययोगेन गायत्र-इति शब्दो निष्पन्नो जातः । गायत्यनेनेति गायत्रम् । सर्ववेदभाष्यकार-सायणाचार्यमते *धातूनाम् अनेकार्थत्वेन स्तुतिक्रियावाचिनो गायति धातोरुत्पन्नो गायत्रशब्दः* इति । अतएव निरुक्तकारयास्काचार्यमते *गायत्रं गायते स्तुतिकर्मणः*[19] इति ।

प्रकारान्तरे गायत्री-शब्दस्य निर्वचनं यास्काचार्येण द्विधा कृतम् । ***त्रिगमना वा विपरीता गायतो मुखादुत्पतदिति च ब्राह्मणम्***[20] इति । अर्थात् – क) त्रि-शब्दपूर्वकात् गमनार्थकात् गम्-धातोः शब्दोऽयं निष्पद्यते । गायत्री त्रिगमना पादत्रये गमनशीला वा, पादत्रयविशिष्टा इत्यर्थः । त्रिगम-शब्द एव अक्षरवैपरीत्येन गायत्री-इति शब्दे परिणतो जातः । त्रिगम = त्रिगाय = गायत्री । स्कन्दस्वामिमते त्रिभिः पादैर्गमनं वर्त्तनं सा त्रिगायेति विपरीताक्षरा गायत्री इति । ख) गै-धातोः पत्-धातोश्च गायत्री-शब्दोऽयं निष्पद्यते । *गायतो ब्रह्मणः मुखात् त्रिभ्यो वेदेभ्यः सकाशात् उदपतत् निरगात् पादश*[21] इति ।

## 5. ऋक्प्रातिशाख्यस्य गायत्रीच्छन्द

ऋक्प्रातिशाख्ये गायत्री-छन्दः चतुर्विंशत्यक्षरविशिष्टं भवति । तस्या अष्टाक्षरस्त्रयः पादा सन्ति, षडक्षरा वा चत्वारः पादाः सन्ति । तदुच्यते – ***गायत्री सा चतुर्विंशत्यक्षरा । अष्टाक्षरास्त्रयः पादाश्चत्वारो वा षळक्षराः*** ।।[22] इति । तदुदाहरणं तु –

अष्टाक्षरस्त्रयः पादाः – अत्र त्रयः पादाः, प्रतिपादे चाष्टाक्षराणि सन्ति । ***अग्निमीळे पुरोहितम् । यज्ञस्य देवमृत्विजम् । होतारं रत्नधातमम् ।।*** (ऋ.- 1.1.1) इति । उदाहरणेऽस्मिन् प्रतिपादे अष्टाक्षराणि सन्ति इति कृत्वा अत्र अष्टाक्षर-त्रिपादविशिष्टा तथा चतुर्विंशत्यक्षरविशिष्टा गायत्री भवति ।।

---

13 पिङ्ग. – मङ्गलाचरणम्, 2
14 पिङ्ग. – मङ्गलाचरणम्, 3
15 पिङ्ग. – मङ्गलाचरणम्,1
16 पिङ्ग. – मङ्गलाचरणम्, 4
17 पिङ्ग. – मङ्गलाचरणम्, 5-9
18 पा. – 3.2.3
19 नि. – 1.3.8.8, 7.12.6
20 नि. – 7.12.7
21 नि. – 7.12.7, भाष्यम्
22 ऋक्प्रा. – 16.16

षडक्षराश्चत्वारः पादाः - अत्र चत्वारः पादाः, प्रतिपादे षडक्षराणि सन्ति । ***इन्द्रः शचीपतिर् । बलेन वीळितः । दुश्च्यवनो वृषा । समत्सु सासहिः।*** इति । उदाहरणेऽस्मिन् प्रतिपादे षडक्षराणि सन्ति इति कृत्वा अत्र षडक्षर-चतुःपादविशिष्टा तथा चतुर्विंशत्यक्षरविशिष्टा गायत्री भवति ।।

तस्याः गायत्र्याः नव विभागाः सन्ति । तद्यथा – पदपङ्क्ति-गायत्री, भुरिक्पदपङ्क्ति-गायत्री, भुरिक्-गायत्री, पादनिचृत्-गायत्री, अतिनिचृत्-गायत्री, वर्धमाना-गायत्री, द्विपदा-गायत्री, यवमध्या-गायत्री, उष्णिग्गर्भा-गायत्री इति ।

पदपङ्क्ति-गायत्री – पदपङ्क्तिगायत्री यद्यपि पञ्चविंशत्यक्षरविशिष्टा भवति, तथापि तत्र प्रतिपादस्थितायाम् अक्षरसंख्यायां विन्यासे किञ्चित्पार्थक्यमस्ति । तद्यथा -

पञ्चकाः पञ्च[23] – अत्र पञ्चाक्षरविशिष्टाः पञ्च पादाः सन्ति, अर्थात् 5+5+5+5+5 = 25 (पञ्चविंशत्यक्षरविशिष्टा) इति । अतएव यदि पञ्चाक्षरविशिष्टाः पञ्च पादाः सन्ति तर्हि पञ्चविंशत्यक्षरविशिष्टा पदपङ्क्ति-गायत्री भवति इति । उदारहणं नास्त्यत्र ।।

द्वौ वा पादौ चतुष्कश्च षट्कश्चैकस्त्रिपञ्चकाः[24] – यदि द्वौ पादौ एकः चतुष्कः (चतुरक्षरविशिष्टः), एकः षट्कः (षळक्षरविशिष्टः), त्रयश्च पादाः पञ्चाक्षराः भवन्ति, तर्हि तत्रापि पदपङ्क्ति-गायत्री भवति । अर्थात् अत्रापि पञ्चविंशत्यक्षरविशिष्टा (4+6+5+5+5 = 25) पदपङ्क्ति-गायत्री भवति इति । उदाहरणं – *अधा ह्यग्ने* (4) *क्रतोर्भद्रस्य* (5) *दक्षस्य साधोः* (5) । *रथीर्ऋतस्य* (5) *बृहतो बभूथ* (6) (ऋ. – 4.10.2) इति ।।

भुरिक्पदपङ्क्ति-गायत्री[25] - यदि प्रथमस्थिताः चत्वारः पादाः पञ्चाक्षरविशिष्टाः भवन्ति, अन्त्यश्च, षडक्षरविशिष्टा तर्हि तत्र षड्विंशत्यक्षरविशिष्टा (5+5+5+5+6 = 26) भुरिक्पदपङ्क्ति-गायत्री भवति । तदुच्यते – ***षड्वान्त्यः पदपङ्क्तिर्हि सा भुरिक्*** इति । यथा – *घृतं न पूतं* (5) *तनूररेपाः* (5) *शुचि हिरण्य* (5) । *तत्ते रुक्मो न* (5) *रोचत स्वधावः* (6) (ऋ. – 4.10.6) इति ।।

भुरिक्-गायत्री[26] - यदि प्रथमपाद अष्टाक्षरविशिष्टः, द्वितीयस्तु दशाक्षरविशिष्टः, तृतीयस्तु सप्ताक्षरविशिष्टो भवति तर्हि पञ्चविंशत्यक्षरविशिष्टा (8+10+7 = 25) भुरिक्-गायत्री भवतीति । तदुच्यते - ***अष्टको दशकः सप्ती विद्वांसाविति सा भुरिक्*** इति । यथा – *विद्वांसाविद् दुरः पृच्छेद्* (8) *अविद्वानित्थापरो अचेताः* (10) । *नू चिन्नु मर्ते अक्रौ* (7) (ऋ. – 1.120.2) इति ।।

पादनिचृत्-गायत्री[27] - यदि पादत्रयं सप्ताक्षरविशिष्टं भवति तर्हि एकविंशत्यक्षरविशिष्टा (7+7+7 = 21) पादनिचृत्-गायत्री भवति । तदर्थं सूत्रितम् –

***युवाकु हीति गायत्री त्रयः सप्ताक्षरा विराट् । सैषा पादनिचृन्नाम गायत्र्यैवैकविंशिका ।।*** इति ।

उदाहरणम् – *युवाकु हि शचीनां* (7) *युवाकु सुमतीनाम्* (7) । *भूयाम वाजदाव्नाम्* (7) (ऋ. – 1.17.4) इति ।।

अतिनिचृत्-गायत्री - अतिनिचृत्-गायत्री द्विधा वर्तते – अ) विंशत्यक्षरविशिष्टा अतिनिचृत्-गायत्री आ) एकविंशत्यक्षरविशिष्टा अतिनिचृत्-गायत्री चेति । पुनः, विंशत्यक्षरविशिष्टायां गायत्र्यां अक्षरविन्यासे किञ्चित्पार्थक्यमस्ति ।

विंशत्यक्षरविशिष्टा अतिनिचृत्-गायत्री – ऋक्प्रातिशाख्ये विंशत्यक्षरविशिष्टा-अतिनिचृत्-गायत्री-प्रसङ्गे सूत्रितम् –

***षट्कः सप्तकयोर्मध्ये स्तोतॄणां विवाचीति । यस्या सातिनिचृन्नाम गायत्री द्विर्दशाक्षरा ।।***[28] इति ।

आशयो यत्, सप्तकयोः पादयोर्मध्ये यदि षट्कः पादोऽस्ति तर्हि तत्र विंशत्यक्षरविशिष्टा (7+6+7 = 20) अतिनिचृत्-गायत्री भवति । यथा – *पुरूतमं पुरूणाम्* (7) *स्तोतॄणां विवाची* (6) । *वाजेभिर्वाजयताम्* (7) (ऋ. – 6.45.29) इति । पुनः, द्विर्दशाक्षरा तथा विंशत्यक्षरविशिष्टा (10 x 2 = 20) अपि अतिनिचृत्-गायत्री भवति यत्र द्वौ पादौ, प्रतिपादे च दशाक्षराणि सन्ति ।

एकविंशत्यक्षरविशिष्टा अतिनिचृत्-गायत्री - ऋक्प्रातिशाख्ये एकविंशत्यक्षरविशिष्टा-अतिनिचृत्-गायत्री-प्रसङ्गे सूत्रितम् –

***षट्कसप्तकयोर्मध्ये स्तुह्यासावतिथिम् । षळक्षरः प्रकृत्यैष व्यूहेनाष्टाक्षरोऽपि वा ।।***[29] इति ।

आशयो यत्, षट्कसप्तकयोर्मध्ये यदि षडक्षरविशिष्टस्य पादस्य व्यूहेनाष्टाक्षरो [6+6 (+2 व्यूहेन 8)+7 = 19+2 = 21] भवति, तर्हि तत्रापि एकविंशत्यक्षरविशिष्टा अतिनिचृत्-गायत्री भवति । यथा – *प्रेष्ठमु प्रियाणां* (6) *स्तुह्यासावातिथिम्* (6) (स्तुहि + आसाव + अतिथिम् = 8, व्यूहेन अष्टाक्षरः) । *अग्निं रथानां यमम्* (7) ।। (ऋ. – 8.103.10) इति ।।

---

[23] ऋक्प्रा. – 16.18
[24] ऋक्प्रा. – 16.18
[25] ऋक्प्रा. – 16.18
[26] ऋक्प्रा. – 16.20
[27] ऋक्प्रा. – 16.21
[28] ऋक्प्रा. – 16.22
[29] ऋक्प्रा. – 16.23

वर्धमाना-गायत्री - वर्धमाना-गायत्री द्विधा वर्तते – अ) एकविंशत्यक्षरविशिष्टा वर्धमाना-गायत्री आ) द्वाविंशत्यक्षरविशिष्टा वर्धमाना-गायत्री चेति ।

एकविंशत्यक्षरविशिष्टा वर्धमाना-गायत्री – ऋक्प्रातिशाख्ये एकविंशत्यक्षरविशिष्टा-वर्धमाना-गायत्री-प्रसङ्गे सूत्रितम् –

***उत्तरोत्तरिणः पादाः षट् सप्ताष्टाविति त्रयः । गायत्री वर्धमानैषा त्वमग्ने यज्ञानामिति ।।***[30] इति ।

आशयो यत्, यदि उत्तरोत्तरिणस्त्रयः पादाः एकैकाक्षरेण वर्धमानाः भवन्ति अर्थात् षट्सप्ताष्टाक्षराः भवन्ति तर्हि एकविंशत्यक्षरविशिष्टा (6+7+8 = 21) वर्धमाना-गायत्री भवति । यथा – *त्वमग्ने यज्ञानां* (6) *होता विश्वेषां हितः* (7) । *देवेभिर्मानुषे जने* (8) ।। (ऋ. – 6.16.1) इति ।।

द्वाविंशत्यक्षरविशिष्टा वर्धमाना-गायत्री – शाखिनामेतेषां मते यदि आद्यन्तौ अष्टकौ पादौ मध्यमश्च षट्कस्तर्हि तत्रापि द्वाविंशत्यक्षरविशिष्टा (8+6+8 = 22) वर्धमाना-गायत्री भवति । सूत्रितं – ***अष्टकौ मध्यमः षट्क एकेषामुपदिश्यते***[31] इति । किमपि उदाहरणं तत्र नास्ति ।।

द्विपदा-गायत्री - ***स नो वाजेषु पादौ द्वौ जागतौ द्विपदोच्यते***[32] इति सूत्रेण ऋक्प्रातिशाख्ये द्विपदा-गायत्री विहिता । आशयो यत्, यदि द्वौ जागतौ पादौ अर्थात् द्वादशाक्षरविशिष्टौ पादौ स्तः, तर्हि तत्र चतुर्विंशत्यक्षरविशिष्टा (12+12 = 24) द्विपदा-गायत्री भवति । यथा – *स नो वाजेष्वविता पुरूवसुः* (*वाजेषु* + *अविता* =12) *पुरःस्थाता मघवा वृत्रहा भुवत्* (12) ।। (ऋ. – 8.46.13) इति ।।

यवमध्या-गायत्री – यदि आद्यन्तौ सप्तकौ पादौ मध्ये च दशकः पादो भवेत् तर्हि चतुर्विंशत्यक्षरविशिष्टा (7+10+7 = 24) यवमध्या-गायत्री भवति । तर्हि सूत्रितं –

***आद्यन्तौ सप्तकौ यस्या मध्ये च दशको भवेत् । यवमध्या च गायत्री स सुन्व इति दृश्यते ।।***[33] इति ।

यथा – *स सुन्वे यो वसूनां* (7) *यो रायामानेता य इळानाम्* (10) । *सोमो यः सुक्षितीनाम्* (7) ।। (ऋ. – 9.108.13) इति ।।

उष्णिग्गर्भा-गायत्री - यदि प्रथमे पादे षडक्षरः, द्वितीये सप्ताक्षरः, तृतीये तथा अन्तिमे तु एकादशाक्षरो भवति तर्हि तत्र चतुर्विंशत्यक्षरविशिष्टा (6+7+11 = 24) उष्णिग्गर्भा-गायत्री भवतीति । सूत्रितम् –

***षडक्षरः सप्ताक्षरस्तत एकादशाक्षरः । एषोष्णिग्गर्भा गायत्री ता मे अश्व्यानामिति ।।***[34] इति ।

यथा – *ता मे अश्व्यानां* (*अश्वियानां* = 6) *हरीणां नितोशना* (7) । *उतो नु कृत्व्यानां* (*कृत्वियानां* = 4) *नृवाहसा* (11) (ऋ. – 8.25.23) इति ।।

<u>कोष्ठेनैकेन ऋक्प्रातिशाख्यस्य गायत्रीछन्दसः एते विभागाः ससूत्रोदाहरणं प्रदर्श्यन्ते –</u>

| नाम | लक्षणम् | अक्षरसंख्या | उदाहरणम् |
|---|---|---|---|
| | | | |
| पदपङ्क्ति-गायत्री | पञ्चकाः पञ्च | 5+5+5+5+5 = 25 | नास्ति |
| पदपङ्क्ति-गायत्री | द्वौ वा पादौ चतुष्कश्च षट्कश्चैकस्त्रिपञ्चकाः | 4+6+5+5+5 = 25 | *अधा ह्यग्ने* (4) *क्रतोर्भद्रस्य* (5) *दक्षस्य साधोः* (5) । *रथीर्ऋतस्य* (5) *बृहतो बभूथ* (6)।। |
| भुरिक्-पदपङ्क्ति-गायत्री | *षड्वान्त्यः पदपङ्क्तिर्हि सा भुरिक्* | 5+5+5+5+6 = 26 | *घृतं न पूतं* (5) *तनूररेपाः* (5) *शुचि हिरण्यम्* (5) । *तत्ते रुक्मो न* (5) *रोचत स्वधावः* (6) ।। |

[30] ऋक्प्रा. – 16.24
[31] ऋक्प्रा. – 16.25
[32] ऋक्प्रा. – 16.26
[33] ऋक्प्रा. – 16.27
[34] ऋक्प्रा. – 16.28

| | | | |
|---|---|---|---|
| भुरिक्-गायत्री | *अष्टको दशकः सप्ती विद्वांसाविति सा भुरिक्* | 8+10+17 = 25 | *विद्वांसाविद् दुरः पृच्छेद्* (8) *अविद्वानित्थापरो अचेताः* (10) । *नू चिन्नु मर्ते अक्रौ* (7) ।। |
| पादनिचृत्-गायत्री | *त्रयः सप्ताक्षरा विराट् । सैषा पादनिचृन्नाम गायत्रैकविंशिका* | 7+7+7 = 21 | *युवाकु हि शचीनां* (7) *युवाकु सुमतीनाम्* (7) । *भूयाम वाजदाव्नाम्* (7) ।। |
| अतिनिचृत्-गायत्री (विंशत्यक्षरविशिष्टा) | *षट्कः सप्तकयोर्मध्ये स्तोतॄणां विवाचीति । यस्या सातिनिचृन्नाम गायत्री द्विर्दशाक्षरा ।।* | 7+6+7 = 20 / 10 x 2 = 20 | *पुरूतमं पुरूणाम्* (7) *स्तोतॄणां विवाची* (6) । *वाजेभिर्वाजयताम्* (7) ।। |
| अतिनिचृत्-गायत्री (एकविंशत्यक्षरविशिष्टा) | *षट्कसप्तकयोर्मध्ये स्तुह्यासावतिथिम् । षळक्षरः प्रकृत्यैष व्यूहेनाष्टाक्षरोऽपि वा ।।* | 6+6 (+2 व्यूहेन 8)+7= 19+2 = 21 | *प्रेष्ठमु प्रियाणां* (6) *स्तुह्यासावातिथिम्* (6) (स्तुहि + आसाव + अतिथिम् = 8, व्यूहेन अष्टाक्षरः) । *अग्निं रथानां यमम्* (7) ।। |
| वर्धमाना-गायत्री (एकविंशत्यक्षरविशिष्टा) | *उत्तरोत्तरिणः पादाः षट् सप्ताष्टाविति त्रयः । गायत्री वर्धमानैषा त्वमग्ने यज्ञानामिति ।।* | 6+7+8 = 21 | *त्वमग्ने यज्ञानां* (6) *होता विश्वेषां हितः* (7) । *देवेभिर्मानुषे जने* (8) ।। |
| वर्धमाना-गायत्री (द्वाविंशत्यक्षरविशिष्टा) | *अष्टकौ मध्यमः षट्क एकेषामुपदिश्यते ।* | 8+6+8 = 22 | नास्ति |
| द्विपदा-गायत्री | *स नो वाजेषु पादौ द्वौ जागतौ द्विपदोच्यते ।* | 12+12 = 24 | *स नो वाजेष्वविता पुरूवसुः* (*वाजेषु + अविता* =12) *पुरःस्थाता मघवा वृत्रहा भुवत्* (12) ।। |
| यवमध्या-गायत्री | *आद्यन्तौ सप्तकौ यस्या मध्ये च दशको भवेत् । यवमध्या च गायत्री स सुन्व इति दृश्यते ।।* | 7+10+7 = 24 | *स सुन्वे यो वसूनां* (7) *यो रायामानेता य इळानाम्* (10) । *सोमो यः सुक्षितीनाम्* (7) ।। |
| उष्णिग्गर्भा-गायत्री | *षडक्षरः सप्ताक्षरस्तत एकादशाक्षरः । एषोष्णिग्गर्भा गायत्री ता मे अश्व्यानामिति ।।* | 6+7+11 = 24 | *ता मे अश्व्यानां* (*अश्वियानां* = 6) *हरीणां नितोशना* (7) । *उतो नु कृत्व्यानां* (*कृत्वियानां* = 4) *नृवाहसा* (11) |

## 6. पिङ्गलच्छन्दःसूत्रस्य गायत्रीच्छन्द

***गायत्र्याः वसवः***[35] इति सूत्रेण पिङ्गलच्छन्दःसूत्रे गायत्र्याः पादसंख्या निर्धारिता । गायत्र्याः पादो वसवोऽष्टाक्षराणि भवन्ति । भरताचार्यानुसारेण अष्टौ वसवस्तु धरः, ध्रुवः, सोमः, विष्णुः, अनिलः, अनलः, प्रत्यूषः, प्रभासश्चेति । वसूनामष्टाक्षरत्वादत्र गायत्र्याः पादो वसवोऽष्टाक्षराणि भवन्ति । अतएव गायत्री

[35] पिङ्ग. – 3.3

चतुर्विंशत्यक्षरविशिष्टा (3x8=24/ (8+8+8 = 24) भवति । कदाचित्सा चतुःपादविशिष्टा अपि भवति । तत्र प्रतिपादेषु षडक्षराणि सन्ति । अत एव तत्रापि गायत्री चतुर्विंशत्यक्षरविशिष्टा (4x6=24/ (6+6+6+6 = 24) भवति । तदर्थं सूत्रितम् – ***आद्यं चतुष्पादृतुभिः***[36] इति । ऋतु-शब्देन हिम-शिशिर-वसन्त-ग्रीष्म-वर्षा-शरदिति कालविशेषो बोध्यः । अत्र ऋतुशब्देन लक्षणया षडक्षरः पादोऽभिधीयते । तैः पादैः चतुष्पादं गायत्रं छन्दो भवति । सूत्रस्थितस्य *आद्यम्*-इति शब्दस्य अर्थस्तु आर्षी-इति । आर्षी गायत्री चतुर्विंशत्यक्षरविशिष्टा भवति । तत्र ***दैव्येकम्***-इति सूत्रेण[37] दैवी-गीयत्री एकाक्षरविशिष्टा, ***आसुरी पञ्चदश***-इति सूत्रेण[38] आसुरी-गायत्री पञ्चादशाक्षरविशिष्टा, ***प्राजापत्याऽष्टौ*** इति सूत्रेण[39] प्राजापत्या गायत्री अष्टाक्षरविशिष्टा भवति । प्राजापत्या आसुरी दैवीति यास्तिस्रो गायत्र्यास्ताः सङ्गताः सत्यश्चतुर्विंशत्यक्षरविशिष्टा एका आर्षी गायत्री भवति । यथा - ***इन्द्रः शचीपतिर् । बलेन वीळितः । दुश्च्यवनो वृषा । समत्सु सासहिः*** इति । उदाहरणेऽस्मिन् प्रतिपादे षडक्षराणि सन्ति इति कृत्वा अत्र षडक्षर-चतुःपादविशिष्टा तथा चतुर्विंशत्यक्षरविशिष्टा गायत्री भवति ।

पिङ्गलच्छन्दःसूत्रानुसारेण गायत्रीछन्दसो देवता एव अग्निः, स्वरस्तु षड्जः, वर्णस्तु सितः, गोत्रञ्च तस्याः आग्निवेश्यः इति । गायत्री तु अष्टधा विभज्यते - आर्षी, दैवी, आसुरी, प्राजापत्या, याजुषी, साम्नी, आर्ची, ब्राह्मी चेति । तत्र दैवी-आसुरी-प्राजापत्या-गायत्री मिलित्वा आर्षीगायत्री, याजुषी-साम्नी-आर्ची-गायत्री मिलित्वा ब्राह्मीगायत्री समुपजायत इति पिङ्गलच्छन्दःसूत्रस्य ऋक्प्रातिशाख्यस्य चाशयः । चित्रेणैकेन तदवगमने सौविध्यं जातम् –

| छन्दः | गायत्री | | छन्दः | गायत्री |
|---|---|---|---|---|
| | | | | |
| आर्षी | 24 | | याजुषी | 6 |
| दैवी | 1 | | साम्नी | 12 |
| आसुरी | 15 | | आर्ची | 18 |
| प्राजापत्या | 8 | | ब्राह्मी | 36 |

पिङ्गलच्छन्दःसूत्रे गायत्री-छन्दसो अष्टविभागाः सन्ति । तद्यथा – पादनिचृत्-गायत्री, अतिपादनिचृत्-गायत्री, नागी-गायत्री, वाराही-गायत्री, वर्धमाना-गायत्री, प्रतिष्ठा-गायत्री, द्विपाद्-विराट्-गायत्री, त्रिपाद्-विराट्-गायत्री इति ।

पादनिचृत्-गायत्री – क्वचिद्वेदे सप्ताक्षरयुक्तैः त्रिभिः पादैरेव गायत्री भवतीति सूचितम् । एवमेकविंशत्यक्षराणि (7x3 = 21/ (7+7+7 = 21) जायन्ते इति । सूत्रितं ***क्वचित्त्रिपादृषिभिः***[40] इति । सप्तर्षय एवास्माकं प्रसिद्धाः । तदर्थं सप्ताक्षराणि इति । सा एकविंशत्यक्षरविशिष्टा गायत्री पादनिचृत्-गायत्री नाम्ना व्यपदिश्यते । तदर्थं सूत्रितं ***सा पादनिचृत्***[41] इति । प्रयोक्तुः अदृष्टाभ्युदयसम्बन्धज्ञापनार्थं इयं संज्ञा वेदस्यानादित्वान्महत्त्वेऽपि न दुष्टेति । उदाहरणं यथा - *युवाकु हि शचीनां* (7) *युवाकु सुमतीनाम्* (7) । *भूयाम वाजदाव्नाम्* (7) (ऋ. – 1.17.4) इति ।।

अतिपादनिचृत्-गायत्री – गायत्री-छन्दसः त्रिषु पादेषु यदि प्रथमे पादे षडक्षराणि, द्वितीये अष्टाक्षराणि, तृतीये तु सप्ताक्षराणि सन्ति तर्हि तत्र त्रिभिः पादैर्या गायत्री सा एकविंशत्यक्षरविशिष्टा (6+8+7 = 24) अतिपादनिचृत्-गायत्री भवतीति । सूत्रितं ***षट्कसप्तकयोर्मध्येऽष्टावतिपादनिचृत्***[42] इति । यथा – *प्रेष्ठं वो अतिथिम्* (6) *स्तुषे मित्रमिव प्रियम्* (8) *अग्ने रथं न वेद्यम्* (7) (ऋ. – 8.84.1) इति ।।

नागी-गायत्री – गायत्री-छन्दसः त्रिषु पादेषु यदि द्वौ नवाक्षरौ पादौ, तृतीयश्च षडक्षरः भवति, तर्हि तत्र त्रिभिः पादैः चतुर्विंशत्यक्षरविशिष्टा (9+9+6 = 24) नागी-गायत्री भवतीति । तदर्थं सूत्रितं – ***द्वौ नवकौ षट्कश्च नागी***[43] इति । यथा – *अग्ने तमद्याश्वं न स्तोमैः* (9) *क्रतुं न भद्रं हृदि स्पृशम्* (9) *ऋध्यामात ओहैः* (6) (ऋ. – 4.10.1) इति ।।

वाराही-गायत्री – ***विपरीता वाराही***[44] इति सूत्रेण वाराही-गायत्री निरूपिता पिङ्गलच्छन्दःसूत्रे । आशयो यत्, नागी-गायत्री यदि विपरीता भवति अर्थात् तत्र प्रथमपादः षडक्षरविशिष्टः, द्वितीय-तृतीयौ च पादौ नवाक्षरविशिष्टौ भवतस्तर्हि तत्रापि चतुर्विंशत्यक्षरविशिष्टा (6+9+9 = 24) वाराही-गायत्री भवतीति । यथा – *अग्ने मृडमहाम्* (6) *असि यइमादेव युज्जन* (9) *इयेथ (इय इथ) बर्हिरासदम्* (9) (ऋ.- 4.9.1), (साम. – 1.23) इति ।।

[36] पिङ्ग. – 3.8
[37] पिङ्ग. – 2.2
[38] पिङ्ग. – 2.4
[39] पिङ्ग. – 2.5
[40] पिङ्ग. – 3.9
[41] पिङ्ग. – 3.10
[42] पिङ्ग. – 3.11
[43] पिङ्ग. – 3.12
[44] पिङ्ग. – 3.13

वर्धमाना-गायत्री - गायत्री-छन्दसः त्रिषु पादेषु यदि प्रथमपादे षडक्षरः, द्वितीयपादे सप्ताक्षरः, तृतीयपादे च अष्टाक्षरो भवति, तर्हि तत्र त्रिभिः पादैः एकविंशत्यक्षरविशिष्टा (6+7+8 = 21) वर्धमाना-गायत्री भवतीति । तदर्थं सूत्रितं – ***षट्कसप्तकाष्टकैर्वर्धमाना***[45] इति । उदाहरणं - *त्वमग्ने यज्ञानां* (6) *होता विश्वेषां हितः* (7) । *देवेभिर्मानुषे जने* (8) (ऋ. – 6.16.1), (साम. – 1.2, 2.824) इति ।।

प्रतिष्ठा-गायत्री - ***विपरीता प्रतिष्ठा***[46] इति सूत्रेण प्रतिष्ठा-गायत्री निरूपिता पिङ्गलच्छन्दःसूत्रे । आशयो यत्, वर्धमाना-गायत्री यदि विपरीता भवति अर्थात् तत्र प्रथमपादः अष्टाक्षरविशिष्टः, द्वितीयपादः सप्ताक्षरविशिष्टः, तृतीयपादश्च षष्ठाक्षरविशिष्टो भवतिस्तर्हि तत्रापि एकविंशत्यक्षरविशिष्टा (8+7+6 = 21) प्रतिष्ठा-गायत्री भवतीति । यथा – *आपः पृणीत भेषजं* (8) *वरूथं तन्वे मम* (7) *ज्योक्च सूर्यं दृशे* (6) (ऋ. – 1.23.21, 10.9.7) इति ।।

द्विपाद्-विराट्-गायत्री – ***तृतीयं द्विपाज्जागतगायत्र्याभ्याम्*** इति सूत्रेण[47] द्विपाद्-विराट्-गायत्री निरूपिता । सूत्रस्थितेन तृतीयशब्देन तृतीयाध्यायस्य सूत्रपाठक्रमापेक्षया विराजमाह । अर्थात् ***विराजो दिशः***[48] इति सूत्रमत्र तृतीयशब्देन बोध्यम् । अत एव यदि एकपादस्तथा प्रथमपादो द्वादशाक्षरविशिष्टः अपरश्च तथा द्वितीयपाद अष्टाक्षरविशिष्टस्यात्तर्हि विंशत्यक्षरविशिष्टा (12+8 = 20) द्विपाद्-विराट्-नाम गायत्री भवतीति । अत्र द्वौ पादौ स्तः । यथा – *नृभिर्येमानो हर्य्यतो (हरियतो) विचक्षणो* (12) *राजादेवः समुद्रियः* (8) (ऋ. – 9.107.16) इति ।।

त्रिपाद्-विराट्-गायत्री – ***त्रिपात् त्रिष्टुभः*** इति सूत्रेण [49] त्रिपाद्-विराट्-गायत्री निरूपिता । समालोच्यमानेन सूत्रेणानेन त्रयस्त्रिंशदक्षरविशिष्टा गायत्री निरूपिता । एकादशाक्षरैः त्रिभिः पादैस्त्रिपाद्-विराट्-गायत्री भवति । सा एव त्रयस्त्रिंशदक्षरविशिष्टा (11+11+11 = 33 / 11x3 = 33) भवति । त्रिष्टुभो रुद्राः इति सूत्रेण त्रैष्टुभपाद इत्युक्ते सति सर्वत्रैव एकादशाक्षरो गृह्यते । यथा – *दुहीयन्मित्रधितये युवाकु* (11) *राये च नो मिमीतं वाजवत्यै* (11) *इषे च नो मिमीतं धेमुमत्यै* (11) (ऋ. – 1.120.9) इति ।।

कोष्ठेनैकेन पिङ्गलच्छन्दःसूत्रस्य गायत्रीछन्दसः एते विभागाः ससूत्रोदाहरणं प्रदर्श्यन्ते –

| नाम | लक्षणम् | अक्षरसंख्या | उदाहरणम् |
|---|---|---|---|
| | | | |
| पादनिचृत्-गायत्री | *क्वचित्रिपादृषिभिः, सा पादनिचृत्* | 7x3 = 21/ (7+7+7 = 21) | *युवाकु हि शचीनां* (7) *युवाकु सुमतीनाम्* (7) । *भूयाम वाजदाव्नाम्* (7) ।। |
| अतिपादनिचृत्-गायत्री | *षट्कसप्तकयोर्मध्येऽष्टावतिपादनिचृत्* | 6+8+7 = 24 | *प्रेष्ठं वो अतिथिम्* (6) *स्तुषे मित्रमिव प्रियम्* (8) *अग्ने रथं न वेद्यम्* (7) ।। |
| नागी-गायत्री | *द्वौ नवकौ षट्कश्च नागी* | 9+9+6 = 24 | *अग्ने तमद्याश्वं न स्तोमैः* (9) *क्रतुं न भद्रं हृदि स्पृशम्* (9) *ऋद्ध्यामात ओहैः* (6) ।। |
| वाराही-गायत्री | *विपरीता वाराही* | 6+9+9 = 24 | *अग्ने मृडमहाम्* (6) *असि यइमादेव युञ्जन* (9) *इयेथ (इय इथ) बर्हिरासदम्* (9) ।। |

[45] पिङ्ग. – 3.14
[46] पिङ्ग. – 3.15
[47] पिङ्ग. – 3.16
[48] पिङ्ग. – 3.5
[49] पिङ्ग. – 3.17

| | | | |
|---|---|---|---|
| वर्धमाना-गायत्री | *षट्कसप्तकाष्टकैर्वर्धमाना* | 6+7+8 = 21 | *त्वमग्ने यज्ञानां* (6) *होता विश्वेषां हितः* (7) । *देवेभिर्मानुषे जने* (8) ।। |
| प्रतिष्ठा-गायत्री | *विपरीता प्रतिष्ठा* | 8+7+6 = 21 | *आपः पृणीत भेषजं* (8) *वरूथं तन्वे मम* (7) *ज्योक्च सूर्यं दृशे* (6) ।। |
| द्विपाद्-विराट्-गायत्री | *तृतीयं द्विपाज्जागतगायत्र्याभ्याम्* | 12+8 = 20 | *नृभिर्येमानो हर्य्यतो (हरियतो) विचक्षणो* (12) *राजादेवः समुद्रियः* (8) ।। |
| त्रिपाद्-विराट्-गायत्री | *त्रिपात् त्रिष्टुभैः* | 11+11+11 = 33 / 11x3 = 33 | *दुहीयन्मित्रधितये युवाकु* (11) *राये च नो मिमीतं वाजवत्यै* (11) *इषे च नो मिमीतं धेमुमत्यै* (11) |

## 7. ऋक्प्रातिशाख्यस्य-पिङ्गलच्छन्दःसूत्रवर्णितस्य गायत्रीछन्दसः तुलनात्मकं समीक्षणम्

इदानीम् ऋक्प्रातिशाख्यस्य षोडशपटलस्थितेन गायत्री-छन्दसा सह पिङ्गलच्छन्दःसूत्रस्थितस्य गायत्री-छन्दसः तुलनात्मकं समीक्षणं निरूप्यते –

ऋक्प्रातिशाख्ये गायत्री-छन्दसः नव-विभागाः सन्ति । तद्यथा - पदपङ्क्ति-गायत्री, भुरिक्पदपङ्क्ति-गायत्री, भुरिक्-गायत्री, पादनिचृत्-गायत्री, अतिनिचृत्-गायत्री, वर्धमाना-गायत्री, द्विपदा-गायत्री, यवमध्या-गायत्री, उष्णिग्गर्भा-गायत्री ।

पिङ्गलच्छन्दःसूत्रे गायत्री-छन्दसः अष्ट-विभागाः सन्ति । तद्यथा - पादनिचृत्-गायत्री, अतिपादनिचृत्-गायत्री, नागी-गायत्री, वाराही-गायत्री, वर्धमाना-गायत्री, प्रतिष्ठा-गायत्री, द्विपाद्-विराट्-गायत्री, त्रिपाद्-विराट्-गायत्री ।

ऋक्प्रातिशाख्ये पञ्चविंशत्यक्षरविशिष्टं गायत्रीछन्दः (पदपङ्क्ति-गायत्री, भूरिक्-गायत्री), षड्विंशत्यक्षरविशिष्टं गायत्रीछन्दः (भूरिकपदपङ्क्ति-गायत्री), द्वाविंशत्यक्षरविशिष्टं गायत्रीछन्दश्च (वर्धमाना-गायत्री) निरूपितम् । पिङ्गलच्छन्दःसूत्रे पञ्चविंशत्यक्षरविशिष्टं, षड्विंशत्यक्षरविशिष्टं, द्वाविंशत्यक्षरविशिष्टं च गायत्रीछन्दः नास्ति ।

ऋक्प्रातिशाख्ये त्रयस्त्रिंशदक्षरविशिष्टं गायत्रीछन्दो नास्ति । परन्तु पिङ्गलच्छन्दःसूत्रे त्रिपाद्-विराड्-गायत्री-नामकं त्रयस्त्रिंशदक्षरविशिष्टं गायत्रीछन्दो निरूपितम् ।

ऋक्प्रातिशाख्ये वर्धमाना-गायत्री द्विविधा – एकविंशत्यक्षरविशिष्टा द्वाविंशत्यक्षरविशिष्टा चेति । परन्तु पिङ्गलच्छन्दःसूत्रे केवलम् एकविंशत्यक्षरविशिष्टा वर्धमाना-गायत्री निरूपितेति दृश्यते ।

ऋक्प्रातिशाख्ये पादद्वयविशिष्टा गायत्री निरूपिता । तत्र प्रतिपादे द्वादशाक्षराणि सन्ति । तस्य गायत्री-छन्दसो नाम एव चतुर्विंशत्यक्षरविशिष्टा द्विपदा-गायत्री । पिङ्गलच्छन्दःसूत्रेऽपि पादद्वयविशिष्टा गायत्री निरूपिता । परन्तु तत्र प्रथमपादे द्वादशाक्षराणि सन्ति, द्वितीये तु अष्टाक्षराणि इति । तस्य गायत्री-छन्दसो नाम एव विंशत्यक्षरविशिष्टा द्विपाद्-विराट्-गायत्री इति ।।

## 8. उपसंहार

शौनकाचार्यविरचितस्य अष्टादशपटलात्मकस्य ऋक्प्रातिशाख्यस्य षोडश-सप्तदश-अष्टादश-पटले वैदिकछन्दोविषये आलोचना समुपलभ्यतेऽस्माभिः । पटलत्रयस्य नाम एव छन्दःपटलम् इति । वैदिकसाहित्ये छन्दःशास्त्रस्योपरि अतीव महत्त्वपूर्णो ग्रन्थ एव आचार्यपिङ्गलविरचितः *पिङ्गलच्छन्दःसूत्रम्* । द्वयोः ग्रन्थयोः गायत्र्यादीनि सप्त छन्दांसि सलक्षणानि सोदारहणानि आलोचितानि । द्वयोर्ग्रन्थयोरेतयोः परिवेशितेषु सप्तसु छन्दसु गायत्रीछन्दसः तुलनात्मकमध्ययनम् एव गवेषणापत्रस्यास्य विषय एव ।

न केवलमृक्प्रातिशाख्ये अपि तु शाङ्ख्यायनश्रौतसूत्रे, सामवेदस्य निदानसूत्रे, पिङ्गलच्छन्दःसूत्रे च छन्दोविषयः सोपपत्तिकं प्रतिपादितोऽस्ति । कात्यायनस्य सर्वानुक्रमण्यामपि छन्दोविषये बहुप्रतिपादितमस्ति । वस्तुतः पिङ्गलच्छन्दःसूत्रं तु वैदिकलौकिकच्छन्दसोः सन्धिस्थलम् । तत्र हि पूर्वार्धे वेदप्रयुक्तच्छन्दसां विवेचनमस्ति, उत्तरार्धे तु लौकिकच्छन्दसामेव । छन्दाःसाहित्ये पिङ्गलसूत्रमेव प्रथमार्षग्रन्थरत्नम् । ततश्च केदारभट्टस्य वृत्तरत्नाकरः

षट्सु अध्यायेषु निबद्धोऽस्ति, गङ्गादासस्य छन्दोमञ्जरी षड्भिः स्तवकैर्निबद्धा, क्षेमेन्द्रस्य सुवृत्ततिलकम्, हेमचन्द्रस्य छन्दोऽनुशासनञ्चेति केचन ख्याताश्छन्दोविषयकग्रन्थाः । इत्थं छन्दःसाहित्यमपि वेदस्य पादत्वेन सम्मतं सुविपुलं सुस्पष्टञ्चेति ।

जयदेव-विरचिते (850 ख्री.) जयदेवछन्दः - इति ग्रन्थेऽपि वैदिकछन्दांसि व्याख्यातानि । ग्रन्थस्यास्य अष्टाध्यायाः सन्ति । तत्र प्रथमाध्याये लघु-गुरु-वर्ण-गण-यतीत्यादीनां विवेचनमस्ति । द्वितीयाध्याये तृतीयाध्याये च वैदिकछन्दसां विवेचनमस्ति । चतुर्थतः सप्तमाध्यायपर्यन्तं लौकिकछन्दसां व्याख्या विहिता । अष्टमे च छन्दःप्रस्तारप्रक्रिया वर्णिता ।

वैदिकच्छन्दसां चर्चा अग्नि-गरुड-नारद-विष्णुपुराणेषु अपि विहिता । अग्निपुराणस्य 328 अध्यायतः 335 अध्याययावत् छन्दविषयकालोचना विहिता । एतेष्वध्यायेषु प्रथम-द्वितीय-तृतीयाध्याये वैदिकच्छन्दांसि आलोचितानि । अवशिष्टेषु लौकिकछन्दांसि विहितानि । विष्णुधर्मोत्तरपुराणस्य तृतीयखण्डान्तर्जतस्य तृतीयाध्याये गायत्रीतः कृति-पर्यन्तानां छन्दसां सामान्यलक्षणं विहितम् । नारदपुराणस्य सप्तपञ्चाशत्तमेऽध्याये[50] वैदिक-लौकिक-छन्दांसि विहितानि । अस्माभिर्ज्ञायते यत् ऋक्प्रातिशाख्ये छन्दसां प्रथम-द्वितीय-तृतीय-वर्गाः सन्ति । भरताचार्यप्रणीते नाट्यशास्त्रम् इति ग्रन्थे वर्गत्रयस्यैतस्य यथाक्रमेण दिव्य-दिव्येतर-दिव्यमानुष इति संज्ञा विधीयते ।[51] महर्षिभर्तृहरि-विरचिते वाक्यपदीयम् इति ग्रन्थस्य ब्रह्मकाण्डे उच्यते छन्दोभ्य एव ***प्रथममेतद्विश्वं व्यवर्तत***[52] इति । निखिलमिदं विश्वं खलु छन्दसो विवर्तमिति । ऋच्यध्यूढं साम गीयते इति वैदिकसिद्धान्तानुसारेण छन्दोयुक्तया ऋचा गानं क्रियते । अत एव साङ्गीतिकदृष्ट्या संस्कृतभाषया छन्दोबद्धानां पद्यानां लयात्मकता अतिमहत्त्वपूर्णास्ति इति ।।

## 9. शब्दसंक्षेपसूची

| | | |
|---|---|---|
| उ. – उणादिसूत्रम् | उ.भा. – उवटभाष्यम् | ऋक्प्रा. - ऋक्प्रातिशाख्यम् |
| ऋक्सर्वा. – ऋक्सर्वानुक्रमणी | तै.स. – तैत्तिरीयसंहिता | दै.ब्रा. – दैवतब्राह्मणम् |
| नाट्य. – नाट्यशास्त्रम् | नार. – नारदपुराणम् | नि. – निरुक्तम् |
| पा. – पाणिनिः | पा.शि. – पाणिनीयशिक्षा | पिङ्ग. – पिङ्गलच्छन्दःसूत्रम् |
| मनु. – मनुस्मृतिः | वाक्य. – वाक्यपदीयम् | |

## ग्रन्थपञ्जी

अष्टाध्यायी । चन्द्रलेखा हिन्दीव्याख्यायुताऽनेकोपयोगिविषयैरूपबृंहिता सूत्रपाठ-सूत्रवार्तिकोदाहरणानां सूच्या चान्विता । मदर्षि-पाणिनिः । व्याख्याकारः-ईश्वरचन्द्रः । प्रथम-द्वितीयभागः, व्रजजीवन प्राच्यभारती ग्रन्थमाला १०३, दिल्लीः चोखम्बा संस्कृत प्रतिष्ठान, २००४.

ऋग्वेदप्रातिशाख्यम्, उवट-भाष्य-सहितम् । सम्पा. सिद्धेश्वर-भट्टाचार्यः । काशी हिन्दू विश्वविद्यालय संस्कृत ग्रन्थमाला । शोध-प्रकाशन-योजना । पञ्चम-पुष्पः, वाराणसी : काशी हिन्दू विश्वविद्यालय शोध-प्रकाशन, १९३०।

ऐतरेयब्राह्मणम्, सायणाचार्यकृत - वेदार्थप्रकाश-नामभाष्येण-सहितम्, सरला - रूपया हिन्दीव्याख्यया चोपेतम् । सम्पादकोऽनुवादकश्च - सुधाकर-मालवीयः । प्रथमभागः – प्रथमतश्चतुर्थपञ्चिकान्तः । प्राच्यभारतीयग्रन्थमाला - १४. वाराणसी : तारा प्रिंटिंग हाउस, १९८०।

छन्दःशास्त्रम्, पिङ्गलनागविरचितम् । हलायुधभट्टविरचितया मृतसञ्जीवन्याख्यया वृत्त्यया समेतम्, समीक्षाचक्रवर्तिराजपण्डितश्रीमधुसूदनविद्यावाचस्पतिरचित - छन्दोनिरुक्तिसनाथीकृतं च । परिमल संस्कृत ग्रन्थमाला संख्या – ६ । दिल्ली : परिमल पब्लिकेशन्स, १९८५ (पुनर्मुद्रितसंस्करणम्) ।

छन्दशास्त्र का उद्भव एवं विस्तार । सम्पा. – श्रीकिशोर मिश्र । विश्वविद्यालय-रजतजयन्ती-ग्रन्थमाला – 44 । वारानसी : सम्पूर्णानन्द संस्कृत विश्वविद्यालय, 2006.

तैत्तिरीयसंहिता, दामोदर-सातवलेकरः । पारडी : स्वाध्यायमण्डलम्, १९४३ (चतुर्थसंस्करणम्) ।

पाणिनीयशिक्षा, व्याख्याकारः शिवराज आचार्यः कौण्डिन्न्यायनः । सम्पादकः - आमोदवर्धनः कौण्डिन्न्यायनः, प्रमोदवर्धनः कौण्डिन्न्यायनः, सुमोदवर्धनः कौण्डिन्न्यायनः । विद्याभवन - प्राच्यविद्या - ग्रन्थमाला - ८९, वाराणसी : चौखम्बा विद्याभवन, २००४ (पुनर्मुद्रितसंस्करणम्) ।

पिङ्गलछन्दःसूत्रम्, यादव प्रकाशप्रणीतेन - पिङ्गलछन्दोविचितिभाष्येण समुपेतम् । सम्पा. विजयपालः । कलकाता : श्रीमती सावित्री देवी बागड़िया ट्रस्ट - १९८८ ।

पिङ्गलच्छन्दःसूत्रम्, हलायुधभट्टकृतवृत्त्या टिप्पन्या वङ्गानुवादेन हिन्दीभाषानुवादेन च समलङ्कृतम् । सम्पा.- सीतानाथसामाध्यायि - भट्टाचार्यः। अमरकुमार-चट्टोपाध्यायेन च परिदृष्टम् । कलिकाता : संस्कृत पुस्तक भाण्डार, २००१ ।

[50] नार. – 57.1-21
[51] नाट्य. – 15.99 (क)
[52] वाक्य. – 1.120

पिङ्गलकृतं छन्दःसूत्रम् वैदिक गणितीय अनुप्रयोगों सहित (The Prosody of Pingala, A Treatise of Vedic and Sanskrit Metrics with applications of Vedic Mathematics). कपिलदेव-द्विवेदी, श्यामलाल-सिंहश्च । वाराणसी : विश्वविद्यालय प्रकाशन, २०१९ ।

The Studies in Chandahsastra. Ed. Bhagyalata Pataskar. Pune : Vedic Samshodhana Mandala (Adarsha Sanskrit Shodha Samstha), 2012.